# वाल्मीकिरामायणे सामाजिकविषयाः

• **बदरीनाथ बळ्ळारि**

**"रामादिवत् वर्तितव्यं न रावणादिवत् "** एवं कन्नड्भाषायां **"राम नडेदन्ते नडे"** इत्यादि आभाणकानि श्रीरामकथायाः महतत्वं निरूपयन्ति। तादृरामकथां जगति लवकुशमुखेन प्रसारितः वाल्मिकिनामकः पिकः। तेन पिकेन स्वकाव्ये न केवलं रामकथा न्यरूपि,तया कथाया सह लोकोपकारिणीनां सूक्तीनां माध्यमेन सुशिक्षा अपि प्रदत्ता। अत एव् इयं रामकथा न केवलं भारतेन किन्तु वैदेशिकैरपि सम्बद्धा। तादृशे रामकथामहार्णवे निरूपितनां नानाविषयकसूक्तीनां उपदेशः निरूप्यते अत्र मया।।

आदौ भोजनविषयकसुभाषितं पश्यामः । यतो हि वयमन्नेन जीवामः। अतः कीदृशमन्नं स्वीकरणीयमिति विषये वाल्मीकिरामायणे अयोध्यारण्यकाण्डयोः निरूपितमस्ति। प्रथमतः कीदृशमन्नं त्याज्यमिति निरूपितं अयोध्याकाण्डे। तथाहि :-

**अपथ्यैः सह सहभुक्ते व्याधिरन्नरसे यथा।** एवं **अपथ्यव्यञ्जनोपेतं भुक्तमन्नमिवातुरम्।**

उभयत्रापि शरीरस्य कृते यत् हानिकारकमन्नमस्ति, तस्य भोजनेन मानवस्य स्वास्थ्यहानिः भवति। अतः तादृशं त्याज्यमिति ज्ञायते। इदानीं भोजनं कथं विधेयमिति निरूपितं अरण्यकाण्डे। तथाहि :-

**स भारः सौम्य भर्तव्यो यो नरं नावसादयेत्।**
**तदन्नमपि भोक्तव्यं जीर्यते यदनामयम्।।**

एकः पुरुषः स्वसामर्थ्यानुगुणं भारं वहति तद्वत् पचनकारकं रोगाकारकं अन्नं स्वीकरोति चेत् तदा सः नीरोगी भवति। एतत् सर्वं आधुनिकाः Metabolism इति व्यवहरन्ति।। अनन्तरमिदानीं वयं अर्थस्य, तेन अर्थेन सम्भव्यमानानां दोषाणां च विषये किञ्चित पश्यामः। आदौ अर्थस्य आवश्यकता जगति अतीव अस्ति इति ज्ञायते। अतः तस्य संग्रहः केन प्रकारेणकरणीयमिति निरूपितं युद्धकाण्डे। तथाहि :-

**अर्थेभ्योऽथ प्रवृद्धेभ्यःसंवृत्तेभ्यस्ततस्ततः।**
**क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्यः इवापगाः।।**

अस्मिन् श्लोके धनस्य संग्रहः कथं करणीयःइति निरूपितमस्ति। यथा पर्वतात् स्वस्थानतः नद्यः बहिरागच्छन्ति तथा अस्माभिरपि सर्वतः अर्थात् सर्वप्रकारेण धनसंग्रहः विधेयः। एवं यः धनी अस्ति सः सर्वदा सुखमुपगच्छति । यदा सः निर्धनी भवति तदा सः सुखोपभोगार्थं पापमर्गेण धनं सम्पादयितुं प्रभवति। तदा सः दोषी भवति। अतः अर्थस्य विषये जागरूकाः भवन्तु इति निरूपितम्।। इदानीं अहिंसा विषयकानि वचनानि स्वीकृत्य किञ्चित् आलोचयामः। अरण्यकाण्डे अहिंसा तत्त्वबोधकानि वाक्यानि समुपलभ्यन्ते। तथाहि :- **अपराधं विना हन्तुं लोको वीर न मंस्यते** अस्य वाक्यस्य अयमर्थः यः वीरपुरुषः अस्ति सः अपराधं विना न हन्त्व्यः । यदि एतत् करोति चेत् तस्य तद् दूषणमेवभवति। एवं **कदर्यकलुषा बुद्धिर्जायते शस्त्रसेवनात्** अनेन वाक्यसमूहेन शस्त्रोपयोगेन मनसः मालिन्यं भवति इत्यपि निरूपितम्। अतः अस्माभिः निष्कारणेन हिंसा न विधेया इति अवबुध्यते।। राज्ये राज्ञः आवश्यकता कथमस्ति इति निरूपितं अयोध्याकाण्डे। यदा दशरथः पञ्चत्वंगतः, तदा राज्ञः आवश्यकता कियती इति तत्रत्यजनाः निरूपयन्ति। तद्यथा :-

**यथा ह्यनुदका नद्यो यथा वाप्यतृणं वनम् ।**
**अगोपाला यथा गावस्तथा राष्ट्रमराजकम्।।**

अस्मिन् श्लोके राज्ञः महत्वं निरूपितमस्ति । अनुदकाः नद्यः यथा शोभां न प्राप्नुवन्ति , यथा वनं तृणेन विना न शोभते , यथा गावः गोपालं विना न शोभन्ते तथा राज्ञा विना राज्यमपि। एवं मत्स्यशाबकं यथा बृहन्मत्स्यः भक्ष्यति तथा सर्वे मनुष्याः परस्परं हिंसायां निमग्ना भवन्ति। राज्ञा पालनवेलायां सर्वेऽपि राजदण्डभयेन साधुकार्यं कुर्वन्ति। यदा राजा मृतः, तदा निर्भयेन पापकार्यं कुर्वन्ति। अतः राज्ये राज्ञः उपस्थितिः अपेक्षिता इति ज्ञायते।।

अस्माकं श्रेयोभिवृद्धिः भवेत् चेत् गुरुसेवा अवश्यं करणीया इति निरूपितमयोध्याकाण्डे। **गुरुवृत्त्यनुरोधेन न किञ्चिदपि दुर्लभम्** गुरुसेवातः अधिकं किमपि नास्ति। एवं यः पित्रोः गुरोश्च अपमानं करोति सः साक्षात् यमालायं गच्छति इत्यपि निरूपितमस्ति।

• **अतिथि उपन्यासकः, द्वैतवेदान्त विभागः, राष्ट्रिय संस्कृत विश्वविद्यालयः, तिरुपतिः**

तेन ज्ञायते गुरोः सेवा अवश्यं कार्या इति॥ रामयणे स्त्रीणां विषये तेषांस्वभाव विषये सम्यक् निरूपितमस्ति। ते चञ्चलस्वभावाः इत्यादिविषयाः निरूपिताः सन्ति। तद्यथ :-

**एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन।**
**समस्थमनुरज्यन्ते विषमस्थं त्यजन्ति च॥**

हे रघुनन्दन! सृष्ट्यारम्भकालतःअयं स्त्रीणां स्वभावः यत्  यःपुरुष धनवान् भवति तं प्रेम्णा उपचरन्ति । यदि सः निर्धनी भवति तदा तं त्यजन्ति इति। एवमेव

**शतह्नदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा।**
**गरुडानिलयो शैघ्र्यमनुगच्छन्ति योषितः॥**

अस्मिन् श्लोके स्त्रीणां स्वभाव एव निरूपितोस्ति। तासु तडिदिव चाञ्चल्यं,आयुधानामिव तीक्ष्णता, गरुत्मान् इव वेगः अस्ति इति निरूपितं। एवं तया पति सेवा एव सर्वदा कार्या इत्यपि निरूपितमस्ति । तदेवं अयोध्यकाण्डसुन्दरकाण्डयोः **स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः।** अस्य अयमर्थः श्रेष्ठस्त्रीणा कृते पतिरेव देवः नान्यः। एवं नारीभ्यः दुःखदानं अनर्थकरमिति सम्यक् निरूपितमस्ति॥ इतः राजशास्त्रविषयान् किञ्चिदालोचयामः। अत्र मया अमात्यराजानौ अधिकृत्य प्रस्तूयते। अमात्यस्य विषये रामायणे बहुषु स्थलेषु बुहुधा निरूपितमस्ति। आदौ

**एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षणः।**
**राजानं राजपुत्रं वा प्रापयेन्महतीं श्रियम्॥**

अस्मिन् श्लोके यः ज्ञानी, शूरः, दक्षः, शास्त्रकोविदः अमात्यः राजानं वा राजपुत्रं महतीं श्रियम् प्रापयति। एवमेव अमात्यः कथं भवेत् इति तस्य लक्षणमाह आदिकविः परस्य वीर्यं स्वबलं च बुद्ध्वा स्थानं क्षयं चैव तथैव वृद्धिम्। तथा स्वपक्षेऽप्यनुमृश्यबुद्ध्या वदेत् क्षमं स्वामिहितं स मन्त्री॥ यः परस्य स्वस्य च बलाबलं विमृश्य लाभादीन् अपि अलोच्य स्वामिनः हितया युक्तिः वदति सः अमात्यः ॥ राज्ञः सकाशे विद्यमानानां अवगुणानां पट्टिका प्रदत्त् आदिकाव्ये । तद अत्र निरूप्यते मया। आहत्य १४ अवगुणाः सन्ति। ते राज्ञि न भवेयुः इति निरूपितमस्ति। 1. नास्तिक्यं 2. अनृतं 3. क्रोधः 4. प्रमादः 5. दीर्घसूत्रता 6. अदर्शनं 7. ज्ञानवत्सु आलस्यं 8. पञ्चवृत्तिता 9. एकचिन्तनम् 10. अनर्थज्ञैश्च मन्त्रणम् 11. मन्त्रस्य अपरिरक्षणम् 12. निश्चितानामनारम्भः 13. मङ्गलकार्यस्य अकरण 14. सर्वतः प्रत्युत्थानं, एते राजपुरुषेण त्याज्यः एव॥

एतादृशाः विषायाः बुहुधा रामायणे निरूपिताःसन्ति चेदपि अञ्जलिमात्रेण निरूपिताः मया । अतः सर्वेपि रामायणस्य अध्ययनदीन् कुर्मः।

**उपयुक्त ग्नन्थसूचिः-**

1. **श्रीमद्वाल्मीकीय रामायण, गीताप्रेस् गोरखपुर,१९०७**
2. **ವಾಲ್ಮೀಕಿರಾಮಾಯಣ,ರಾಮಾಯಣಪ್ರಕಾಶನ ೨೦೧೭**
3. **रामायण सूक्तीसुधा, मानद अचार्य संस्कृत अध्ययन केन्द्रं, २००२**

❖